# Shri KumarI SahasranAmastotram

# શ્રીકુમારીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : kumArIsahasranAmastotram evam kavachaM rudrayAmale

File name : shrIkumArIsahasranAmastotram.itx

Category : sahasranAma, devii, durgA, stotra, devI

Location : doc_devii

Transliterated by : http://muktalib5.org

Proofread by : http://muktalib5.org,DPD

Description-comments : shrIrudrayAmale uttaratantre siddhamantra-prakaraNe divyabhAvanirNaye dashamaH paTalaH

Latest update : April 26, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીકુમારીસહસ્રનામસ્તોત્રમ્

આનન્દભૈરવ ઉવાચ
વદ કાન્તે સદાનન્દસ્વરૂપાનન્દવલ્લભે ।
કુમાર્યા દેવતામુખ્યાઃ પરમાનન્દવર્ધનમ્ ॥ ૧॥

અષ્ટોત્તરસહસ્રાખ્યં નામ મઙ્ગલમદ્ભુતમ્ ।
યદિ મે વર્તતે વિદ્યે યદિ સ્નેહકલામલા ॥ ૨॥

તદા વદસ્વ કૌમારીકૃતકર્મફલપ્રદમ્ ।
મહાસ્તોત્રં કોટિકોટિ કન્યાદાનફલં ભવેત્ ॥ ૩॥

આનન્દભૈરવી ઉવાચ
મહાપુણ્યપ્રદં નાથ શ‍ૃણુ સર્વેશ્વરપ્રિય ।
અષ્ટોત્તરસહસ્રાખ્યં કુમાર્યાઃ પરમાદ્ભુતમ્ ॥ ૪॥

પઠિત્ત્વા ધારયિત્ત્વા વા નરો મુચ્યેત સઙ્કટાત્ ।
સર્વત્ર દુર્લભં ધન્યં ધન્યલોકનિષેવિતમ્ ॥ ૫॥

અણિમાદ્યષ્ટસિદ્ધ્યઙ્ગં સર્વાનન્દકરં પરમ્ ।
માયામન્ત્રનિરસ્તાઙ્ગં મન્ત્રસિદ્ધિપ્રદે નૃણામ્ ॥ ૬॥

ન પૂજા ન જપં સ્નાનં પુરશ્ચર્યાવિધિશ્ચ ન ।
અકસ્માત્ સિદ્ધિમવાપ્નોતિ સહસ્રનામપાઠતઃ ॥ ૭॥

સર્વયજ્ઞફલં નાથ પ્રાપ્નોતિ સાધકઃ ક્ષણાત્ ।
મન્ત્રાર્થં મન્ત્રચૈતન્યં યોનિમુદ્રાસ્વરૂપકમ્ ॥ ૮॥

કોટિવર્ષશતેનાપિ ફલં વક્તું ન શક્યતે ।
તથાપિ વક્તુમિચ્છામિ હિતાય જગતાં પ્રભો ॥ ૯॥

અસ્યાઃ શ્રીકુમાર્યાઃ સહસ્રનામકવચસ્ય
વટુકભૈરવઋષિઃ । અનુષ્ટુપ્છન્દઃ । કુમારીદેવતા ।

સર્વમન્ત્રસિદ્ધિસમૃદ્ધયે વિનિયોગઃ ॥ ૧૦॥

ૐ કુમારી કૌશિકી કાલી કુરુકુલ્લા કુલેશ્વરી ।
કનકાભા કાઞ્ચનાભા કમલા કાલકામિની ॥ ૧૧॥

કપાલિની કાલરૂપા કૌમારી કુલપાલિકા ।
કાન્તા કુમારકાન્તા ચ કારણા કરિગામિની ॥ ૧૨॥

કન્ધકાન્તા કૌલકાન્તા કૃતકર્મફલપ્રદા ।
કાર્યાકાર્યપ્રિયા કક્ષા કંસહન્ત્રી કુરુક્ષયા ॥ ૧૩॥

કૃષ્ણકાન્તા કાલરાત્રિઃ કર્ણેષુધારિણીકરા ।
કામહા કપિલા કાલા કાલિકા કુરુકામિની ॥ ૧૪॥

કુરુક્ષેત્રપ્રિયા કૌલા કુન્તી કામાતુરા કચા ।
કલઞ્જભક્ષા કૈકેયી કાકપુચ્છધ્વજા કલા ॥ ૧૫॥

કમલા કામલક્ષ્મી ચ કમલાનનકામિની ।
કામધેનુસ્વરૂપા ચ કામહા કામમદીની ॥ ૧૬॥

કામદા કામપૂજ્યા ચ કામાતીતા કલાવતી ।
ભૈરવી કારણાઢ્યા ચ કૈશોરી કુશલાઙ્ગલા ॥ ૧૭॥

કમ્બુગ્રીવા કૃષ્ણનિભા કામરાજપ્રિયાકૃતિઃ ।
કઙ્કણાલઙ્કૃતા કઙ્કા કેવલા કાકિની કિરા ॥ ૧૮॥

કિરાતિની કાકભક્ષા કરાલવદના કૃશા ।
કેશિની કેશિહા કેશા કાસામ્બષ્ઠા કરિપ્રિયા ॥ ૧૯॥

કવિનાથસ્વરૂપા ચ કટુવાણી કટુસ્થિતા ।
કોટરા કોટરાક્ષી ચ કરનાટકવાસિની ॥ ૨૦॥

કટકસ્થા કાષ્ઠસંસ્થા કન્દર્પા કેતકી પ્રિયા ।
કેલિપ્રિયા કમ્બલસ્થા કાલદૈત્યવિનાશિની ॥ ૨૧॥

કેતકીપુષ્પશોભાઢ્યા કર્પૂરપૂર્ણજિહ્વિકા ।
કર્પૂરાકરકાકોલા કૈલાસગિરિવાસિની ॥ ૨૨॥

કુશાસનસ્થા કાદમ્બા કુઞ્જરેશી કુલાનના ।
ખર્બા ખડ્ગધરા ખડ્ગા ખલહા ખલબુદ્ધિદા ॥ ૨૩॥

ખઞ્જના ખરરૂપા ચ ક્ષારામ્લતિક્તમધ્યગા ।
ખેલના ખેટકકરા ખરવાક્યા ખરોત્કટા ॥ ૨૪॥

ખદ્યોતચઞ્ચલા ખેલા ખદ્યોતા ખગવાહિની ।
ખેટકસ્થા ખલાખસ્થા ખેચરી ખેચરપ્રિયા ॥ ૨૫॥

ખચરા ખરપ્રેમા ખલાઢ્યા ખચરાનના ।
ખેચરેશી ખરોગ્રા ચ ખેચરપ્રિયભાષિણી ॥ ૨૬॥

ખર્જૂરાસવસંમત્તા ખર્જૂરફલભોગિની ।
ખાતમધ્યસ્થિતા ખાતા ખાતામ્બુપરિપૂરિણી ॥ ૨૭॥

ખ્યાતિઃ ખ્યાતજલાનન્દા ખુલના ખઞ્જનાગતિઃ ।
ખલ્વા ખલતરા ખારી ખરોદ્વેગનિકૃન્તની ॥ ૨૮॥

ગગનસ્થા ચ ભીતા ચ ગભીરનાદિની ગયા ।
ગઙ્ગા ગભીરા ગૌરી ચ ગણનાથ પ્રિયા ગતિઃ ॥ ૨૯॥

ગુરુભક્તા ગ્વાલિહીના ગેહિની ગોપિની ગિરા ।
ગોગણસ્થા ગાણપત્યા ગિરિજા ગિરિપૂજિતા ॥ ૩૦॥

ગિરિકાન્તા ગણસ્થા ચ ગિરિકન્યા ગણેશ્વરી ।
ગાધિરાજસુતા ગ્રીવા ગુર્વી ગુર્વ્યમ્બશઙ્કુરી ॥ ૩૧॥

ગન્ધર્વકામિની ગીતા ગાયત્રી ગુણદા ગુણા ।
ગુગ્ગુલુસ્થા ગુરોઃ પૂજ્યા ગીતાનન્દપ્રકાશિની ॥ ૩૨॥

ગયાસુરપ્રિયાગેહા ગવાક્ષજાલમધ્યગા ।
ગુરુકન્યા ગુરોઃ પત્ની ગહના ગુરુનાગિની ॥ ૩૩॥

ગુલ્ફવાયુસ્થિતા ગુલ્ફા ગર્દ્ભા ગર્દ્ભપ્રિયા ।
ગુહ્યા ગુહ્યગણસ્થા ચ ગરિમા ગૌરિકા ગુદા ॥ ૩૪॥

ગુદોર્ધ્વસ્થા ચ ગલિતા ગણિકા ગોલકા ગલા ।
ગાન્ધર્વી ગાનનગરી ગન્ધર્વગણપૂજિતા ॥ ૩૫॥

ઘોરનાદા ઘોરમુખી ઘોરા ઘર્મનિવારિણી ।
ઘનદા ઘનવર્ણા ચ ઘનવાહનવાહના ॥ ૩૬॥

ઘર્ઘરધ્વનિચપલા ઘટાઘટપટાઘટા ।
ઘટિતા ઘટના ઘોના ઘનરુપ ઘનેશ્વરી ॥ ૩૭॥

ઘુણ્યાતીતા ઘર્ઘરા ચ ઘોરાનનવિમોહિની ।
ઘોરનેત્રા ઘનરુચા ઘોરભૈરવ કન્યકા ॥ ૩૮॥

ઘાતાઘાતકહા ઘાત્યા ઘ્રાણાઘ્રાણેશવાયવી ।
ઘોરાન્ધકારસંસ્થા ચ ઘસના ઘસ્વરા ઘરા ॥ ૩૯॥

ઘોટકેસ્થા ઘોટકા ચ ઘોટકેશ્વરવાહના ।
ઘનનીલમણિશ્યામા ઘર્ઘરેશ્વરકામિની ॥ ૪૦॥

ઙકારકૂટસમ્પન્ના ઙકારચક્રગામિની ।
ઙકારી ઙસંજ્ઞા ચૈવ ઙીપનીતા ઙકારિણી ॥ ૪૧॥

ચન્દ્રમણ્ડલમધ્યસ્થા ચતુરા ચારુહાસિની ।
ચારુચન્દ્રમુખી ચૈવ ચલઙ્ગમગતિપ્રિયા ॥ ૪૨॥

ચઞ્ચલા ચપલા ચણ્ડી ચેકિતાના ચરુસ્થિતા ।
ચલિતા ચાનના ચાર્વ્વી ચારુભ્રમરનાદિની ॥ ૪૩॥

ચૌરહા ચન્દ્રનિલયા ચૈન્દ્રી ચન્દ્રપુરસ્થિતા ।
ચક્રકૌલા ચક્રરૂપા ચક્રસ્થા ચક્રસિદ્ધિદા ॥ ૪૪॥

ચક્રિણી ચક્રહસ્તા ચ ચક્રનાથકુલપ્રિયા ।
ચક્રાભેદ્યા ચક્રકુલા ચક્રમણ્ડલશોભિતા ॥ ૪૫॥

ચક્રેશ્વરપ્રિયા ચેલા ચેલાજિનકુશોત્તરા ।
ચતુર્વેદસ્થિતા ચણ્ડા ચન્દ્રકોટિસુશીતલા ॥ ૪૬॥

ચતુર્ગુણા ચન્દ્રવર્ણા ચાતુરી ચતુરપ્રિયા ।
ચક્ષુઃસ્થા ચક્ષુવસતિશ્ચણકા ચણકપ્રિયા ॥ ૪૭॥

ચાર્વ્વઙ્ગી ચન્દ્રનિલયા ચલદમ્બુજલોચના ।
ચર્વ્વરીશા ચારુમુખી ચારુદન્તા ચરસ્થિતા ॥ ૪૮॥

ચસકસ્થાસવા ચેતા ચેતઃસ્થા ચૈત્રપૂજિતા ।
ચાક્ષુષી ચન્દ્રમલિની ચન્દ્રહાસમણિપ્રભા ॥ ૪૯॥

છલસ્થા છુદ્રરૂપા ચ છત્રચ્છાયાછલસ્થિતા ।
છલજ્ઞા છેશ્વરાછાયા છાયા છિન્નશિવા છલા ॥ ૫૦॥

છત્રાચામરશોભાઢ્યા છત્રિણાં છત્રધારિણી ।

છિન્નાતીતા છિન્નમસ્તા છિન્નકેશા છલોદ્ભવા ॥ ૫૧॥

છલહા છલદા છાયા છન્ના છન્નજનપ્રિયા ।
છલછિન્ના છદ્મવતી છદ્મસદ્મનિવાસિની ॥ ૫૨॥

છદ્મગન્ધા છદાછન્ના છદ્મવેશી છકારિકા ।
છગલા રક્તભક્ષા ચ છગલામોદરક્તપા ॥ ૫૩॥

છગલણ્ડેશકન્યા ચ છગલણ્ડકુમારિકા ।
છુરિકા છુરિકકરા છુરિકારિનિવાશિની ॥ ૫૪॥

છિન્નનાશા છિન્નહસ્તા છોણલોલા છલોદરી ।
છલોદ્વેગા છાઙ્ગબીજમાલા છાઙ્ગવરપ્રદા ॥ ૫૫॥

જટિલા જઠરશ્રીદા જરા જજ્ઞાપ્રિયા જયા ।
જન્ત્રસ્થા જીવહા જીવા જયદા જીવયોગદા ॥ ૫૬॥

જયિની જામલસ્થા ચ જામલોદ્ભવનાયિકા ।
જામલપ્રિયકન્યા ચ જામલેશી જવાપ્રિયા ॥ ૫૭॥

જવાકોટિસમપ્રખ્યા જવાપુષ્પપ્રિયા જના ।
જલસ્થા જગવિષયા જરાતીતા જલસ્થિતા ॥ ૫૮॥

જીવહા જીવકન્યા ચ જનાર્દ્દનકુમારિકા ।
જતુકા જલપૂજ્યા ચ જગન્નાથાદિકામિની ॥ ૫૯॥

જીર્ણાઙ્ગી જીર્ણહીના ચ જીમૂતાત્ત્યન્તશોભિતા ।
જામદા જમદા જૃમ્ભા જૃમ્ભણાસ્ત્રાદિધારિણી ॥ ૬૦॥

જઘન્યા જારજા પ્રીતા જગદાનન્દવર્દ્ધીની ।
જમલાર્જુનદર્પઘ્ની જમલાર્જુનભઞ્જિની ॥ ૬૧॥

જયિત્રીજગદાનન્દા જામલોલ્લાસસિદ્ધિદા ।
જપમાલા જાપ્યસિદ્ધિર્જપયજ્ઞપ્રકાશિની ॥ ૬૨॥

જામ્બુવતી જામ્બવતઃ કન્યકાજનવાજપા ।
જવાહન્ત્રી જગદ્બુદ્ધિર્જગત્કર્તૃ જગદ્ગતિઃ ॥ ૬૩॥

જનની જીવની જાયા જગન્માતા જનેશ્વરી ।
ઝલ્લુલા ઝલ્લુમધ્યસ્થા ઝણત્કારસ્વરૂપિણી ॥ ૬૪॥

ઝણત્ઝણદ્ઘણ્ટિરૂપા ઝનનાઝન્દરીશ્વરી ।
ઝટિતાક્ષા ઝરા ઝઞ્ઝા ઝર્ઝરા ઝરકન્યકા ॥ ૬૫॥

ઝણત્કારી ઝના ઝન્ના ઝકારમાલયાવૃતા ।
ઝઙ્કુરી ઝર્ઝરી ઝલ્લી ઝલ્વેશ્વરનિવાસિની ॥ ૬૬॥

ઞકારી ઞકિરાતી ચ ઞકારબીજમાલિની ।
ઞનયોઽન્તા ઞકારાન્તા ઞકારપરમેશ્વરી ॥ ૬૭॥

ઞાન્તબીજપુટાકારા ઞેકલે ઞૈકગામિની ।
ઞૈકનેલા ઞસ્વરૂપા ઞહારા ઞહરીતકી ॥ ૬૮॥

ટુણ્ટુની ટઙ્કહસ્તા ચ ટાન્તવર્ગા ટલાવતી ।
ટપલા ટાપબાલાખ્યા ટઙ્કારધ્વનિરૂપિણી ॥ ૬૯॥

ટલાતી ટાક્ષરાતીતા ટિત્કારાદિકુમારિકા ।
ટઙ્કાસ્ત્રધારિણી ટાના ટમોટાર્ણલભાષિણી ॥ ૭૦॥

ટઙ્કારી વિધના ટાકા ટકાટકવિમોહિની ।
ટઙ્કારધરનામાહા ટિવીખેચરનાદિની ॥ ૭૧॥

ઠઠઙ્કારી ઠાઠરૂપા ઠકારબીજકારણા ।
ડમરૂપ્રિયવાદ્યા ચ ડામરસ્થા ડબીજિકા ॥ ૭૨॥

ડાન્તવર્ગા ડમરુકા ડરસ્થા ડોરડામરા ।
ડગરાર્દ્ધા ડલાતીતા ડદારુકેશ્વરી ડુતા ॥ ૭૩॥

ઢાર્દ્ધનારીશ્વરા ઢામા ઢક્કારી ઢલના ઢલા ।
ઢકેસ્થા ઢેશ્વરસુતા ઢેમનાભાવઢોનના ॥ ૭૪॥

ણોમાકાન્તેશ્વરી ણાન્તવર્ગસ્થા ણતુનાવતી ।
ણનો માણાઙ્કુકલ્યાણી ણાક્ષવીણાક્ષબીજિકા ॥ ૭૫॥

તુલસીતન્તુસૂક્ષ્માખ્યા તારલ્યા તૈલગન્ધિકા ।
તપસ્યા તાપસસુતા તારિણી તરુણી તલા ॥ ૭૬॥

તન્ત્રસ્થા તારકબ્રહ્મસ્વરૂપા તન્તુમધ્યગા ।
તાલભક્ષત્રિધામૂર્ત્તીસ્તારકા તૈલભક્ષિકા ॥ ૭૭॥

તારોગ્રા તાલમાલા ચ તકરા તિન્તિડીપ્રિયા ।
તપસઃ તાલસન્દર્ભા તર્જયન્તી કુમારિકા ॥ ૭૮॥

તોકાચારા તલોદ્વેગા તક્ષકા તક્ષકપ્રિયા ।
તક્ષકાલઙ્કૃતા તોષા તાવદ્રૂપા તલપ્રિયા ॥ ૭૯॥

તલાસ્ત્રધારિણી તાપા તપસાં ફલદાયિની ।
તલ્વલ્વપ્રહરાલીતા તલારિગણનાશિની ॥ ૮૦॥

તૂલા તૌલી તોલકા ચ તલસ્થા તલપાલિકા
તરુણા તપ્તબુદ્ધિસ્થાસ્તમા પ્રધારિણી તપા ॥ ૮૧॥

તન્ત્રપ્રકાશકરણી તન્ત્રાર્થદાયિની તથા ।
તુષારકિરણાઙ્ગી ચ ચતુર્ધા વા સમપ્રભા ॥ ૮૨॥

તૈલમાર્ગાભિસૂતા ચ તન્ત્રસિદ્ધિફલપ્રદા ।
તામ્રપર્ણા તામ્રકેશા તામ્રપાત્રપ્રિયાતમા ॥ ૮૩॥

તમોગુણપ્રિયા તોલા તક્ષકારિનિવારિણી ।
તોષયુક્તા તમાયાચી તમષોઢેશ્વરપ્રિયા ॥ ૮૪॥

તુલના તુલ્યરુચિરા તુલ્યબુદ્ધિસ્ત્રિધા મતિઃ ।
તક્રભક્ષા તાલસિદ્ધિઃ તત્રસ્થાસ્તત્ર ગામિની ॥ ૮૫॥

તલયા તૈલભા તાલી તન્ત્રગોપનતત્પરા ।
તન્ત્રમન્ત્રપ્રકાશા ચ ત્રિશરેણુસ્વરૂપિણી ॥ ૮૬॥

ત્રિંશદર્થપ્રિયા તુષ્ટા તુષ્ટિસ્તુષ્ટજનપ્રિયા ।
થકારકૂટદણ્ડીશા થદણ્ડીશપ્રિયાઽથવા ॥ ૮૭॥

થકારાક્ષરરૂઢાઙ્ગી થાન્તવર્ગાથ કારિકા ।
થાન્તા થમીશ્વરી થાકા થકારબીજમાલિની ॥ ૮૮॥

દક્ષદામપ્રિયા દોષા દોષજાલવનાશ્રિતા ।
દશા દશનઘોરા ચ દેવીદાસપ્રિયા દયા ॥ ૮૯॥

દૈત્યહન્ત્રીપરા દૈત્યા દૈત્યાનાં મર્દીની દિશા ।
દાન્તા દાન્તપ્રિયા દાસા દામના દીર્ઘકેશિકા ॥ ૯૦॥

દશના રક્તવર્ણા ચ દરીગ્રહનિવાસિની
દેવમાતા ચ દુર્લભા ચ દીર્ઘાઙ્ગા દાસકન્યકા ॥ ૯૧॥

દશનશ્રી દીર્ઘનેત્રા દીર્ઘનાસા ચ દોષહા ।

દમયન્તી દલસ્થા ચ દ્વેષ્યહન્ત્રી દશસ્થિતા ॥ ૯૨॥

દૈશેષિકા દિશિગતા દશનાસ્ત્રવિનાશિની
દારિદ્ર્યહા દરિદ્રસ્થા દરિદ્રધનદાયિની ॥ ૯૩॥

દન્તુરા દેશભાષા ચ દેશસ્થા દેશનાયિકા ।
દ્વેષરૂપા દ્વેષહન્ત્રી દ્વેષારિગણમોહિની ॥ ૯૪॥

દામોદરસ્થાનનાદા દલાનાં બલદાયિની ।
દિગ્દર્શના દર્શનસ્થા દર્શનપ્રિયવાદિની ॥ ૯૫॥

દામોદરપ્રિયા દાન્તા દામોદરકલેવરા ।
દ્રાવિણી દ્રવિણી દક્ષા દક્ષકન્યા દલદૃઢા ॥ ૯૬॥

દૃઢાસનાદાસશક્તિર્દ્વન્દ્વયુદ્ધપ્રકાશિની ।
દધિપ્રિયા દધિસ્થા ચ દધિમઙ્ગલકારિણી ॥ ૯૭॥

દર્પહા દર્પદા દૃપ્તા દર્ભપુણ્યપ્રિયા દધિઃ ।
દર્ભસ્થા દ્રુપદસુતા દ્રૌપદી દ્રુપદપ્રિયા ॥ ૯૮॥

ધર્મચિન્તા ધનાધ્યક્ષા ધશ્રેશ્વરવરપ્રદા ।
ધનહા ધનદા ધન્વી ધનુર્હસ્તા ધનુઃપ્રિયા ॥ ૯૯॥

ધરણી ધૈર્યરૂપા ચ ધનસ્થા ધનમોહિની ।
ધોરા ધીરપ્રિયાધારા ધરાધારણતત્પરા ॥ ૧૦૦॥

ધાન્યદા ધાન્યબીજા ચ ધર્માધર્મસ્વરૂપિણી ।
ધારાધરસ્થા ધન્યા ચ ધર્મપુઞ્જનિવાસિની ॥ ૧૦૧॥

ધનાઢ્યપ્રિયકન્યા ચ ધન્યલોકૈશ્ચ સેવિતા ।
ધર્માર્થકામમોક્ષાઙ્ગી ધર્માર્થકામમોક્ષદા ॥ ૧૦૨॥

ધરાધરા ધુરોણા ચ ધવલા ધવલામુખી ।
ધરા ચ ધામરૂપા ચ ધ્રુવા ધ્રૌવ્યા ધ્રુવપ્રિયા ॥ ૧૦૩॥

ધનેશી ધારણાખ્યા ચ ધર્મનિન્દાવિનાશિની ।
ધર્મતેજોમયી ધર્મ્યા ધૈર્યાગ્રભર્ગમોહિની ॥ ૧૦૪॥

ધારણા ધૌતવસના ધત્તૂરફલભોગિની ।
નારાયણી નરેન્દ્રસ્થા નારાયણકલેવરા ॥ ૧૦૫॥

નરનારાયણપ્રીતા ધર્મનિન્દા નમોહિતા ।
નિત્યા નાપિતકન્યા ચ નયનસ્થા નરપ્રિયા ॥ ૧૦૬॥

નામ્રી નામપ્રિયા નારા નારાયણસુતા નરા ।
નવીનનાયકપ્રીતા નવ્યા નવફલપ્રિયા ॥ ૧૦૭॥

નવીનકુસુમપ્રીતા નવીનાનાં ધ્વજાનુતા ।
નારી નિમ્બસ્થિતાનન્દાનન્દિની નન્દકારિકા ॥ ૧૦૮॥

નવપુષ્પમહાપ્રીતા નવપુષ્પસુગન્ધિકા ।
નન્દનસ્થા નન્દકન્યા નન્દમોક્ષપ્રદાયિની ॥ ૧૦૯॥

નમિતા નામભેદા ચ નામ્નાર્ત્તવનમોહિની ।
નવબુદ્ધિપ્રિયાનેકા નાકસ્થા નામકન્યકા ॥ ૧૧૦॥

નિન્દાહીના નવોલ્લાસા નાકસ્થાનપ્રદાયિની ।
નિમ્બવૃક્ષસ્થિતા નિમ્બા નાનાવૃક્ષનિવાસિની ॥ ૧૧૧॥

નાશ્યાતીતા નીલવર્ણા નીલવર્ણા સરસ્વતી ।
નભઃસ્થા નાયકપ્રીતા નાયકપ્રિયકામિની ॥ ૧૧૨॥

નૈવવર્ણા નિરાહારા નિવીહાણાં રજઃપ્રિયા ।
નિમ્નનાભિપ્રિયાકારા નરેન્દ્રહસ્તપૂજિતા ॥ ૧૧૩॥

નલસ્થિતા નલપ્રીતા નલરાજકુમારિકા ।
પરેશ્વરી પરાનન્દા પરાપરવિભેદિકા ॥ ૧૧૪॥

પરમા પરચક્રસ્થા પાર્વતી પર્વતપ્રિયા ।
પારમેશી પર્વનાના પુષ્પમાલ્યપ્રિયા પરા ॥ ૧૧૫॥

પરા પ્રિયા પ્રીતિદાત્રી પ્રીતિઃ પ્રથમકામિની ।
પ્રથમા પ્રથમા પ્રીતા પુષ્પગન્ધપ્રિયા પરા ॥ ૧૧૬॥

પૌષ્ણી પાનરતા પીના પીનસ્તનસુશોભના ।
પરમાનરતા પુંસાં પાશહસ્તા પશુપ્રિયા ॥ ૧૧૭॥

પલલાનન્દરસિકા પલાલધૂમરૂપિણી ।
પલાશપુષ્પસઙ્કાશા પલાશપુષ્પમાલિની ॥ ૧૧૮॥

પ્રેમભૂતા પદ્મમુખી પદ્મરાગસુમાલિની ।
પદ્મમાલા પાપહરા પતિપ્રેમવિલાસિની ॥ ૧૧૯॥

પઞ્ચાનનમનોહારી પઞ્ચવક્ત્રપ્રકાશિની ।
ફલમૂલાશના ફાલી ફલદા ફાલ્ગુનપ્રિયા ॥ ૧૨૦॥

ફલનાથપ્રિયા ફલ્લી ફલ્ગુકન્યા ફલોન્મુખી ।
ફેત્કારીતન્ત્રમુખ્યા ચ ફેત્કારગણપૂજિતા ॥ ૧૨૧॥

ફેરવી ફેરવસુતા ફલભોગોદ્ભવા ફલા ।
ફલપ્રિયા ફલાશક્તા ફાલ્ગુનાનન્દદાયિની ॥ ૧૨૨॥

ફાલભોગોત્તરા ફેલા ફુલામ્ભોજનિવાસિની ।
વસુદેવગૃહસ્થા ચ વાસવી વીરપૂજિતા ॥ ૧૨૩॥

વિષભક્ષા બુધસુતા બ્લુઙ્કારી બ્લૂવરપ્રદા ।
બ્રાહ્મી બૃહસ્પતિસુતા વાચસ્પતિવરપ્રદા ॥ ૧૨૪॥

વેદાચારા વેદ્યપરા વ્યાસવક્ત્રસ્થિતા વિભા ।
બોધજ્ઞા વૌષડાખ્યા ચ વંશીવંદનપૂજિતા ॥ ૧૨૫॥

વજ્રકાન્તા વજ્રગતિર્બદરીવંશવિવર્દ્ધીની ।
ભારતી ભવરશ્રીદા ભવપત્ની ભવાત્મજા ॥ ૧૨૬॥

ભવાની ભાવિની ભીમા ભિષગ્ભાર્યા તુરિસ્થિતા ।
ભૂર્ભુવઃસ્વઃસ્વરૂપા ચ ભૃશાર્ત્તા ભેકનાદિની ॥ ૧૨૭॥

ભૌતી ભઙ્ગપ્રિયા ભઙ્ગભઙ્ગહા ભઙ્ગહારિણી ।
ભર્તા ભગવતી ભાગ્યા ભગીરથનમસ્કૃતા ॥ ૧૨૮॥

ભગમાલા ભૂતનાથેશ્વરી ભાર્ગવપૂજિતા ।
ભૃગુવંશા ભીતિહરા ભૂમિર્ભુજગહારિણી ॥ ૧૨૯॥

ભાલચન્દ્રાભભલ્વબાલા ભવભૂતિવીભૂતિદા ।
મકરસ્થા મત્તગતિર્મદમત્તા મદપ્રિયા ॥ ૧૩૦॥

મદિરાષ્ટાદશભુજા મદિરા મત્તગામિની ।
મદિરાસિદ્ધિદા મધ્યા મદાન્તર્ગતિસિદ્ધિદા ॥ ૧૩૧॥

મીનભક્ષા મીનરૂપા મુદ્રામુદ્રપ્રિયા ગતિઃ ।
મુષલા મુક્તિદા મૂર્ત્તા મૂકીકરણતત્પરા ॥ ૧૩૨॥

મૃષાર્ત્તા મૃગતૃષ્ણા ચ મેષભક્ષણતત્પરા ।

મૈથુનાનન્દસિદ્ધિશ્ચ મૈથુનાનલસિદ્ધિદા ॥ ૧૩૩॥

મહાલક્ષ્મીર્ભૈરવી ચ મહેન્દ્રપીઠનાયિકા ।
મનઃસ્થા માધવીમુખ્યા મહાદેવમનોરમા ॥ ૧૩૪॥

યશોદા યાચના યાસ્યા યમરાજપ્રિયા યમા ।
યશોરાશિવિભૂષાઙ્ગી યતિપ્રેમકલાવતી ॥ ૧૩૫॥

રમણી રામપત્ની ચ રિપુહા રીતિમધ્યગા ।
રુદ્રાણી રૂપદા રૂપા રૂપસુન્દરધારિણી ॥ ૧૩૬॥

રેતઃસ્થા રેતસઃ પ્રીતા રેતઃસ્થાનનિવાસિની ।
રેન્દ્રાદેવસુતારેદા રિપુવર્ગાન્તકપ્રિયા ॥ ૧૩૭॥

રોમાવલીન્દ્રજનની રોમકૂપજગત્પતિઃ ।
રૌપ્યવર્ણા રૌદ્રવર્ણા રૌપ્યાલઙ્કારભૂષણા ॥ ૧૩૮॥

રઙ્ગિણા રઙ્ગરાગસ્થા રણવહ્નિકુલેશ્વરી ।
લક્ષ્મીઃ લાઙ્ગલહસ્તા ચ લાઙ્ગલી કુલકામિની ॥ ૧૩૯॥

લિપિરૂપા લીઢપાદા લતાતન્તુસ્વરૂપિણી ।
લિમ્પતી લેલિહા લોલા લોમશપ્રિયસિદ્ધિદા ॥ ૧૪૦॥

લૌકિકી લૌકિકીસિદ્ધિર્લઙ્કાનાથકુમારિકા ।
લક્ષ્મણા લક્ષ્મીહીના ચ લપ્રિયા લાર્ણમધ્યગા ॥ ૧૪૧॥

વિવસા વસનાવેશા વિવસ્ચકુલકન્ચકા ।
વાતસ્થા વાતરૂપા ચ વેલમધ્યનિવાસિની ॥ ૧૪૨॥

શ્મશાનભૂમિમધ્યસ્થા શ્મશાનસાધનપ્રિયા ।
શવસ્થા પરસિદ્ધ્યર્થી શવવક્ષસિ શોભિતા ॥ ૧૪૩॥

શરણાગતપાલ્યા ચ શિવકન્યા શિવપ્રિયા ।
ષટ્ચક્રભેદિની ષોઢા ન્યાસજાલદૃઢાનના ॥ ૧૪૪॥

સન્ધ્યાસરસ્વતી સુન્ધા સૂર્યગા શારદા સતી ।
હરિપ્રિયા હરહાલાલાવણ્યસ્થા ક્ષમા ક્ષુધા ॥ ૧૪૫॥

ક્ષેત્રજ્ઞા સિદ્ધિદાત્રી ચ અમ્બિકા ચાપરાજિતા ।
આદ્યા ઇન્દ્રપ્રિયા ઈશા ઉમા ઊઢા ઋતુપ્રિયા ॥ ૧૪૬॥

સુતુણ્ડા સ્વરબીજાન્તા હરિવેશાદિસિદ્ધિદા ।
એકાદશીવ્રતસ્થા ચ એન્દ્રી ઓષધિસિદ્ધિદા ॥ ૧૪૭॥

ઔપકારી અંશરૂપા અસ્ત્રબીજપ્રકાશિની ।
ઇત્યેતત્ કામુકીનાથ કુમારીણાં સુમઙ્ગલમ્ ॥ ૧૪૮॥

ત્રૈલોક્યફલદં નિત્યમષ્ટોત્તરસહસ્રકમ્ ।
મહાસ્તોત્રં ધર્મસારં ધનધાન્યસુતપ્રદમ્ ॥ ૧૪૯॥

સર્વવિદ્યાફલોલ્લાસં ભક્તિમાન્ યઃ પઠેત્ સુધીઃ ।
સ સર્વદા દિવારાત્રૌ સ ભવેન્મુક્તિમાર્ગગઃ ॥ ૧૫૦॥

સર્વત્ર જયમાપ્નોતિ વીરાણાં વલ્લભો લભેત્ ।
સર્વે દેવા વશં યાન્તિ વશીભૂતાશ્ચ માનવાઃ ॥ ૧૫૧॥

બ્રહ્માણ્ડે યે ચ શંસન્તિ તે તુષ્ટા નાત્ર સંશયઃ ।
યે વશન્તિ ચ ભૂર્લોકે દેવતુલ્યપરાક્રમાઃ ॥ ૧૫૨॥

તે સર્વે ભૃત્યતુલ્યાશ્ચ સત્યં સત્યં કુલેશ્વર ।
અકસ્માત્ સિદ્ધિમાપ્નોતિ હોમેન યજનેન ચ ॥ ૧૫૩॥

જાપ્યેન કવચાદ્યેન મહાસ્તોત્રાર્થપાઠતઃ ।
વિના યજ્ઞૈર્વિના દાનૈર્વિના જાપ્યૈર્લભેત્ ફલમ્ ॥ ૧૫૪॥

યઃ પઠેત્ સ્તોત્રકં નામ ચાષ્ટોત્તરસહસ્રકમ્ ।
તસ્ય શાન્તિર્ભવેત્ ક્ષિપ્રં કન્યાસ્તોત્રં પઠેત્તતઃ ॥ ૧૫૫॥

વારત્રયં પ્રપાઠેન રાજાનં વશમાનયેત્ ।
વારૈકપઠિતો મન્ત્રી ધર્માર્થકામમોક્ષભાક્ ॥ ૧૫૬॥

ત્રિદિનં પ્રપઠેદ્વિદ્વાન્ યદિ પુત્રં સમિચ્છતિ ।
વારત્રયક્રમેણૈવ વારૈકક્રમતોઽપિ વા ॥ ૧૫૭॥

પઠિત્ત્વા ધનરત્નાનામધિપઃ સર્વવિત્તગઃ ।
ત્રિજગન્મોહયેન્મન્ત્રી વત્સરાર્દ્ધં પ્રપાઠતઃ ॥ ૧૫૮॥

વત્સરં વાપ્ય યદિ વા ભક્તિભાવેન યઃ પઠેત્ ।
ચિરજીવી ખેચરત્ત્વં પ્રાપ્ય યોગી ભવેન્નરઃ ॥ ૧૫૯॥

મહાદૂરસ્થિતં વર્ણં પશ્યતિ સ્થિરમાનસઃ ।
મહિલામણ્ડલે સ્થિત્ત્વા શક્તિયુક્તઃ પઠેત્ સુધીઃ ॥ ૧૬૦॥

સ ભવેત્સાધકશ્રેષ્ઠઃ ક્ષીરી કલ્પદ્રુમો ભવેત્ ।
સર્વદા યઃ પઠેન્નાથ ભાવોદ્ધતકલેવરઃ ॥ ૧૬૧॥

દર્શનાત્ સ્તમ્ભનં કર્ત્તું ક્ષમો ભવતિ સાધકઃ ।
જલાદિસ્તમ્ભને શક્તો વહ્નિસ્તમ્ભાદિસિદ્ધિભાક્ ॥ ૧૬૨॥

વાયુવેગી મહાવાગ્મી વેદજ્ઞો ભવતિ ધ્રુવમ્ ।
કવિનાથો મહાવિદ્યો વન્ધકઃ પણ્ડિતો ભવેત્ ॥ ૧૬૩॥

સર્વદેશાધિપો ભૂત્ત્વા દેવીપુત્રઃ સ્વયં ભવેત્ ।
કાન્તિં શ્રિયં યશો વૃદ્ધિં પ્રાપ્નોતિ બલવાન્ યતિઃ ॥ ૧૬૪॥

અષ્ટસિદ્ધિયુતો નાથ યઃ પઠેદર્થસિદ્ધયે ।
ઉજ્જટેઽરણ્યમધ્યે ચ પર્વતે ઘોરકાનને ॥ ૧૬૫॥

વને વા પ્રેતભૂમૌ ચ શવોપરિ મહારણે ।
ગ્રામે ભગ્નગૃહે વાપિ શૂન્યાગારે નદીતટે ॥ ૧૬૬॥

ગઙ્ગાગર્ભે મહાપીઠે યોનિપીઠે ગુરોર્ગૃહે ।
ધાન્યક્ષેત્રે દેવગૃહે કન્યાગારે કુલાલયે ॥ ૧૬૭॥

પ્રાન્તરે ગોષ્ઠમધ્યે વા રાજાદિભયહીનકે ।
નિર્ભયાદિસ્વદેશેષુ શિવલિઙ્ગાલયેઽથવા ॥ ૧૬૮॥

ભૂતગર્ત્તે ચૈકલિઙ્ગે વા શૂન્યદેશે નિરાકુલે ।
અશ્વત્થમૂલે બિલ્વે વા કુલવૃક્ષસમીપગે ॥ ૧૬૯॥

અન્યેષુ સિદ્ધદેશેષુ કુલરૂપાશ્ચ સાધકઃ ।
દિવ્યે વા વીરભાવસ્થો યષ્ટ્વા કન્યાં કુલાકુલૈ ॥ ૧૭૦॥

કુલદ્રવ્યૈશ્ચ વિવિધૈઃ સિદ્ધિદ્રવ્યૈશ્ચ સાધકઃ ।
માંસાસવેન જુહુયાન્મુક્તેન રસેન ચ ॥ ૧૭૧॥

હુતશેષં કુલદ્રવ્યં તાભ્યો દદ્યાત્ સુસિદ્ધયે ।
તાસામુચ્છિષ્ટમાનીય જુહુયાદ્ રક્તપઙ્કજે ॥ ૧૭૨॥

ઘૃણાલજ્જાવિનિર્મુક્તઃ સાધકઃ સ્થિરમાનસઃ ।
પિબેન્માંસરસં મન્ત્રી સદાનન્દો મહાબલી ॥ ૧૭૩॥

મહામાંસાષ્ટકં તાભ્યો મદિરાકુમ્ભપૂરિતમ્ ।

તારો માયા રમાવહ્નિજાયામન્ત્રં પઠેત્ સુધીઃ ॥ ૧૭૪॥

નિવેદ્ય વિધિનાનેન પઠિત્ત્વા સ્તોત્રમઙ્ગલમ્ ।
સ્વયં પ્રસાદં ભુક્ત્વા હિ સર્વવિદ્યાધિપો ભવેત્ ॥ ૧૭૫॥

શૂકરસ્યોષ્ટ્રમાંસેન પીનમીનેન મુદ્રયા ।
મહાસવઘટેનાપિ દત્ત્વા પઠતિ યો નરઃ ॥ ૧૭૬॥

ધ્રુવં સ સર્વગામી સ્યાદ્ વિના હોમેન પૂજયા ।
રુદ્રરૂપો ભવેન્નિત્યં મહાકાલાત્મકો ભવેત્ ॥ ૧૭૭॥

સર્વપુણ્યફલં નાથ ક્ષણાત્ પ્રાપ્નોતિ સાધકઃ ।
ક્ષીરાબ્ધિરત્નકોષેશો વિયદ્વ્યાપી ચ યોગિરાટ્ ॥ ૧૭૮॥

ભક્ત્યાહ્લાદં દયાસિન્ધું નિષ્કામત્ત્વં લભેદ્ ધ્રુવમ્ ।
મહાશત્રુપાતને ચ મહાશત્રુભયાદ્દીતે ॥ ૧૭૯॥

વારૈકપાઠમાત્રેણ શત્રૂણાં વધમાનયેત્ ।
સમર્દયેત્ શત્રૂન્ ક્ષિપ્રમન્ધકારં યથા રવિઃ ॥ ૧૮૦॥

ઉચ્ચાટને મારણે ચ ભયે ઘોરતરે રિપૌ ।
પઠનાદ્ધારણાન્મર્ત્ત્યો દેવા વા રાક્ષસાદયઃ ॥ ૧૮૧॥

પ્રાપ્નુવન્તિ ઝટિત્ શાન્તિં કુમારીનામપાઠતઃ ।
પુરુષો દક્ષિણે બાહૌ નારી વામકરે તથા ॥ ૧૮૨॥

ધૃત્વા પુત્રાદિસમ્પત્તિં લભતે નાત્ર સંશયઃ ॥ ૧૮૩॥

મમાજ્ઞયા મોક્ષમુપૈતિ સાધકો
ગજાન્તકં નાથ સહસ્રનામ ચ ।
પઠેન્મનુષ્યો યદિ ભક્તિભાવત-
સ્તદા હિ સર્વત્ર ફલોદયં લભેત્ ચ ॥ ૧૮૪॥

મોક્ષં સત્ફલભોગિનાં સ્તવવરં સારં પરાનન્દદં
યે નિત્યં હિ મુદા પઠન્તિ વિફલં સાર્થઞ્ચ ચિન્તાકુલાઃ
તે નિત્યાઃ પ્રભવન્તિ કીતીકમલે શ્રીરામતુલ્યો જયે
કન્દર્પાયુતતુલ્યરૂપગુણિનઃ ક્રોધે ચ રુદ્રોપમાઃ ॥ ૧૮૫॥

॥ ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને
કુમાર્યુપચર્યાવિન્યાસે

સિદ્ધમન્ત્ર-પ્રકરણે દિવ્યભાવનિર્ણયે
અષ્ટોત્તરસહસ્રનામમઙ્ગલોલ્લાસે
દશમપટલે શ્રીકુમારીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

From Digital Library at http://muktalib5.org
Proofread byDPD

*Shri KumarI SahasranAmastotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*